# Shri Krishnastavarajah

# શ્રીકૃષ્ણસ્તવરાજઃ

## Document Information

Text title : kRRiShNastavarAjaH

File name : kRRiShNastavarAjaH.itx

Category : vishhnu, krishna, stavarAja, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તવરાજઃ

કૃષ્ણદાસવિરચિતઃ

અનન્તકન્દર્પકલાવિલાસં કિશોરચન્દ્રં રસિકેન્દ્રશેખરમ્ ।
શ્યામં મહાસુન્દરતાનિધાનં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૧॥

અનન્તવિદ્યુદ્યુતિચારુપીતં કૌશેયસંવીતનિતમ્બબિમ્બમ્ ।
અનન્તમેઘચ્છવિદિવ્યમૂર્તિં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૨॥

મહેન્દ્રચાપચ્છવિપિચ્છચૂઢં કસ્તૂરિકાચિત્રકશોભિમાલમ્ ।
મન્દાદરોદ્ઘૂર્ણવિશાલનેત્રં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૩॥

ભ્રાજિષ્ણુગલ્લં મકરાઙ્કિતેન વિચિત્રરત્નોજ્જ્વલકુણ્ડલેન ।
કોટીન્દુલાવણ્યમુખારવિન્દં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૪॥

વૃન્દાટવીમઞ્જુલકુઞ્જવાદ્યં શ્રીરાધયા સાર્ધમુદારકેલિમ્ ।
આનન્દપુઞ્જં લલિતાદિદૃશ્યં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૫॥

મહાર્હકેયૂરકકઙ્કણશ્રીગ્રૈવેયહારાવલિમુદ્રિકાભિઃ ।
વિભૂષિતં કિઙ્કિણિનૂપુરાભ્યાં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૬॥

વિચિત્રરત્નોજ્જ્વલદિવ્યવાસાપ્રગીતરામાગુણરૂપલીલમ્ ।
મુહુર્મુહુઃ પ્રોદિતરોમહર્ષં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૭॥

શ્રીરાધિકેયાધરસેવનેન માદ્યન્તમુચ્ચૈ રતિકેલિલોલમ્ ।
સ્મરોન્મદાન્ધં રસિકેન્દ્રમૌલિં શ્રીકૃષ્ણચન્દ્રં શરણં ગતોઽસ્મિ ॥ ૮॥

અઙ્કે નિધાય પ્રણયેન રાધાં મુહુર્મુહુશ્ચુમ્બિતતન્મુખેન્દુમ્ ।
વિચિત્રવેષૈઃ કૃતતદ્વિભૂષણં શ્રીકૃષ્ણચન્દ્રં શરણ ગતોઽસ્મિ ॥ ૯॥

ઇતિ કૃષ્ણદાસવિરચિતઃ શ્રીકૃષ્ણસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

*Shri Krishnastavarajah*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*